# Dvijaprokta Darshanoparanta Shiva Stuti 2

# દ્વિજપ્રોક્તા દર્શનોપરાન્ત શિવસ્તુતિઃ ૨

## Document Information

Text title : Dvijaprokta Darshanoparanta Shiva Stuti 2

File name : dvijaproktAdarshanoparAntashivastutiH2.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 25| vAvRittasholkAH||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 22, 2024

*sanskritdocuments.org*

# દ્વિજપ્રોક્તા દર્શનોપરાન્ત શિવસ્તુતિઃ ૨

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

- -

તદાનીં શ્રીમહાદેવઃ કરુણાસાગરઃ પ્રભુઃ ।
આવિરાસીદ્વૃષારૂઢઃ શિવાશ્લિષ્ટવપુઃ શિવઃ ॥ ૮૦॥

શશામ શીતલો જાતઃ પ્રવજ્લન્નપિ પાવકઃ ।
સ દદર્શ તતઃ શમ્ભું નાનાપ્રમથસેવિતમ્ ॥ ૮૧॥

ઉમાસંશ્લિષ્ટવામાઙ્ગં વૃષભારૂઢમવ્યયમ્ ।
સોમસૂર્યાગ્નિનયનં સોમાર્ધકૃતશેખરમ્ ॥ ૮૨॥

અભયપ્રદમીશાનં ચેકિતાનમજં વિભુમ્ ।
અનન્તચન્દ્રપ્રતિમમનન્તરવિસન્નિભમ્ ॥ ૮૩॥

અનન્તવહ્નિપ્રતિમં વસ્તુતોઽપ્રતિમં શિવમ્ ।
અતિસુન્દરમીશાનમમેયગુણસંશ્રયમ્ ॥ ૮૪॥

મન્દારમાલાસંવીતં વૃન્દારકગણાર્ચિતમ્ ।
એતાદૃશં શિવં દૃષ્ટ્વા પ્રહૃષ્ટહૃદયો દ્વિજઃ ॥ ૮૫॥

મૂર્ધ્ન્યઞ્જલિમાધાય પ્રાહ શમ્ભું શિવાર્ચકઃ ॥ ૮૬॥

- -

દ્વિજઃ ઉવાચ -
દાનપાત્રમહં શમ્ભો દાનકાલોઽયમીશ્વર ।
દાતા ત્વન્નેતરો યાચ્યો યાચ્યા ભક્તિસ્ત્વયિ પ્રભો ॥ ૯૯॥

ન યાચે ન યાચે મહાદેવ શમ્ભો
વરાનન્યદેવાનહં ભક્તબન્ધો ।
પરન્ત્વેકરૂપાં મદન્યૈરલભ્યાં
ભવદ્ભક્તિમેકાં પરામીશ યાચે ॥ ૧૦૦॥

યયૈવેશ ભક્ત્યા તૃણીકૃત્ય સર્વા-
નુપેન્દ્રાદિદેવાનહં સર્વથાપિ ।
ત્વદર્ચાપરો નિત્યમવ્યગ્રચિત્તો
નિરાતઙ્કમેવં ભવન્તં ભજામિ ॥ ૧૦૧॥

તવૈતત્પદદ્વન્દ્વમિન્દ્રાદિવન્દ્યં
સદોપેન્દ્રહૃત્પઙ્કજારૂઢમીડ્યમ્ ।
મમાપિ સ્ફુરવીશ હૃત્પદ્મમધ્યે
મુકુન્દાક્ષિપદ્માર્ચિતં વેદવેદ્યમ્ ॥ ૧૦૨॥

મહાદેવ વિશ્વેશ વિશ્વૈકવન્દ્ય
સ્મરારે પુરારે મહાપાતકારે ।
મહેશેતિ નામામૃતં ત્વત્પ્રસાદા-
ત્પિબત્વન્વહં સાધુ જિહ્વા મમૈષા ॥ ૧૦૩॥

વિભો દેવ દેવેશ ગૌરીશ શમ્ભો
યમારે ગજારે ભવારેઽન્ધકારે ।
શિવેશેતિ નાનામૃતં ત્વત્પ્રસાદા-
ત્પિબત્વન્વહં સાધુ જિહ્વા મમૈપા ॥ ૧૦૪॥

ઉમાકાન્ત મૌનેન્દ્રવિશ્રામહેતો
જગજ્જીવનાનન્દધર્મૈસેતો ।
નિરીહેતિ નામામૃતં ત્વત્પ્રસાદા-
ત્પિબત્વન્વહં સાધુ જિહ્વા મમૈપા ॥ ૧૦૫॥

નિરાકાર નિર્લિપ્ત ચન્દ્રાર્ધમૌલે
મુકુન્દાદિવૃન્દારકારાધ્યમૂર્તે ।
પરેશેતિ નામામૃતં ત્વત્પ્રસાદા-
ત્પિબત્વન્વહં સાધુ જિહ્વા મમૈપા ॥ ૧૦૬॥

મુનિસ્વાન્તપદ્મપ્રબોધૈકભાનો
સ્ફુરત્ભાલભાગોત્થલીલાકૃશાનો ।
ગિરીશેતિ નામામૃતં ત્વત્પ્રસાદા-
ત્પિબત્વન્વહં સાધુ જિહ્વા મમૈપા ॥ ૧૦૭॥

ગુણાતીત કલ્યાણનાનાગુણાબ્ધે

વૃષાધીશકેતો મહાપુણ્યહેતો ।
સુરેશેતિ નામામૃતં ત્વત્પ્રસાદા-
ત્પિબત્વન્વહં સાધુ જિહ્વા મમૈપા ॥ ૧૦૮॥

કૃપાપાત્ર ચન્દ્રાનલોષ્ણાંશુનેત્ર
સ્વભક્તૈકમિત્રાદ્રિકન્યાકલત્ર ।
ઉમેશેતિ નામામૃતં ત્વત્પ્રસાદા-
ત્પિબત્વન્વહં સાધુ જિહ્વા મમૈપા ॥ ૧૦૯॥

શિવ શ્રીપતિસ્વચ્છનેત્રારવિન્દ-
સ્ફુરત્પાદપદ્મામિતાનન્તભોગ ।
કૃપાબ્ધેતિ (ગિરીશેતિ) નામામૃતં ત્વત્પ્રસાદા-
ત્પિબત્વન્વહં સાધુ જિહ્વા મમૈપા ॥ ૧૧૦॥

હરામેય નિર્દ્વન્દ્વ વેદાન્તવેદ્ય
ત્રિશૂલિન્નુમાકાન્ત કર્પૂરગૌર ।
નિરાગેતિ નામામૃતં ત્વત્પ્રસાદા-
ત્પિબત્વન્વહં સાધુ જિહ્વા મમૈપા ॥ ૧૧૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે દ્વિજપ્રોક્તા દર્શનોપરાન્ત શિવસ્તુતિઃ ૨ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૫। વાવૃત્તશ્લોકાઃ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 25 . vAvRRittashlokAH..

Proofread by Ruma Dewan

*Dvijaprokta Darshanoparanta Shiva Stuti 2*

pdf was typeset on June 22, 2024

Please send corrections to *sanskrit@cheerful.com*